श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीलक्ष्मीद्वादशनामस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीलक्ष्मीद्वादशनामस्तोत्रम् ॥

श्रीदेवी प्रथमं नाम द्वितीयममृतोद्भवा।
तृतीयं कमला प्रोक्ता चतुर्थं लोकसुन्दरी॥ १ ॥

पञ्चमं विष्णुपत्नी च षष्ठं स्यात् वैष्णवी तथा।
सप्तमं तु वरारोहा अष्टमं हरिवल्लभा॥ २ ॥

नवमं शार्ङ्गिणी प्रोक्ता दशमं देवदेविका।
एकादशं तु लक्ष्मीः स्यात् द्वादशं श्रीहरिप्रिया॥ ३ ॥

द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः।
आयुरारोग्यमैश्वर्यं तस्य पुण्यफलप्रदम्॥ ४ ॥

द्विमासं सर्वकार्याणि षण्मासाद्राज्यमेव च।
संवत्सरं तु पूजायाः श्रीलक्ष्म्याः पूज्य एव च॥ ५ ॥

लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गधामेश्वरीं
दासीभूत समस्त देववनितां लोकैक दीपांकुराम्।
श्रीमन्मन्दकटाक्ष लब्ध विभव ब्रह्मेन्द्र गंगाधरां
त्वां त्रैलोक्य कुटुंबिनीं सरसिजां वन्दे मुकुन्दप्रियाम्॥ ६ ॥

॥ इति श्रीलक्ष्मीद्वादशनामस्तोत्रं सम्पूर्णम् ॥

www.prapatti.com